# Surya Sun Kavacham

# સૂર્યકવચમ્

## Document Information

Text title : suuryakavacha 3

File name : suuryakavach.itx

Category : kavacha, navagraha

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : Mike Magee mike.magee at theregister.co.uk

Proofread by : Mike Magee mike.magee at theregister.co.uk

Latest update : August 23, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

Surya Sun Kavacham

# સૂર્યકવચમ્

વજ્રપઞ્જરાખ્યસૂર્યકવચમ્ ।

શ્રીભૈરવ ઉવાચ -

યો દેવદેવો ભગવાન્ ભાસ્કરો મહસાં નિધિઃ ।
ગયત્રીનાયકો ભાસ્વાન્ સવિતેતિ પ્રગીયતે ॥ ૧॥

તસ્યાહં કવચં દિવ્યં વજ્રપઞ્જરકાભિધમ્ ।
સર્વમન્ત્રમયં ગુહ્યં મૂલવિદ્યારહસ્યકમ્ ॥ ૨॥

સર્વપાપાપહં દેવિ દુઃખદારિદ્ર્યનાશનમ્ ।
મહાકુષ્ઠહરં પુણ્યં સર્વરોગનિબર્હણમ્ ॥ ૩॥

સર્વશત્રુસમૂહઘ્નં સમ્ગ્રામે વિજયપ્રદમ્ ।
સર્વતેજોમયં સર્વદેવદાનવપૂજિતમ્ ॥ ૪॥

રણે રાજભયે ઘોરે સર્વોપદ્રવનાશનમ્ ।
માતૃકાવેષ્ટિતં વર્મ ભૈરવાનનનિર્ગતમ્ ॥ ૫॥

ગ્રહપીડાહરં દેવિ સર્વસઙ્કટનાશનમ્ ।
ધારણાદસ્ય દેવેશિ બ્રહ્મા લોકપિતામહઃ ॥ ૬॥

વિષ્ણુર્નારાયણો દેવિ રણે દૈત્યાઞ્જિઓષ્યતિ ।
શઙ્કરઃ સર્વલોકેશો વાસવોઽપિ દિવસ્પતિઃ ॥ ૭॥

ઓષધીશઃ શશી દેવિ શિવોઽહં ભૈરવેશ્વરઃ ।
મન્ત્રાત્મકં પરં વર્મ સવિતુઃ સારમુત્તમમ્ ॥ ૮॥

યો ધારયેદ્ ભુજે મૂર્ધ્નિ રવિવારે મહેશ્વરિ ।
સ રાજવલ્લભો લોકે તેજસ્વી વૈરિમર્દનઃ ॥ ૯॥

બહુનોક્તેન કિં દેવિ કવચસ્યાસ્ય ધારણાત્ ।
ઇહ લક્ષ્મીધનારોગ્ય-વૃદ્ધિર્ભવતિ નાન્યથા ॥ ૧૦॥

પરત્ર પરમા મુક્તિર્દેવાનામપિ દુર્લભા ।
કવચસ્યાસ્ય દેવેશિ મૂલવિદ્યામયસ્ય ચ ॥ ૧૧॥

વજ્રપઞ્જરકાખ્યસ્ય મુનિર્બ્રહ્મા સમીરિતઃ ।
ગાયત્ર્યં છન્દ ઇત્યુક્તં દેવતા સવિતા સ્મૃતઃ ॥ ૧૨॥

માયા બીજં શરત્ શક્તિર્નમઃ કીલકમીશ્વરિ ।
સર્વાર્થસાધને દેવિ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૧૩॥

ઓં અં આં ઇં ઈં શિરઃ પાતુ ઓં સૂર્યો મન્ત્રવિગ્રહઃ ।
ઉં ઊં ઋં ૠં લલાટં મે હ્રાં રવિઃ પાતુ ચિન્મયઃ ॥ ૧૪॥

ૡં ૡૃં એં ઐં પાતુ નેત્રે હ્રીં મમારુણસારથિઃ ।
ઓં ઔં અં અઃ શ્રુતી પાતુ સઃ સર્વજગદીશ્વરઃ ॥ ૧૫॥

કં ખં ગં ઘં પાતુ ગણ્ડૌ સૂં સૂરઃ સુરપૂજિતઃ ।
ચં છં જં ઝં ચ નાસાં મે પાતુ યાર્ં અર્યમા પ્રભુઃ ॥ ૧૬॥

ટં ઠં ડં ઢં મુખં પાયાદ્ યં યોગીશ્વરપૂજિતઃ ।
તં થં દં ધં ગલં પાતુ નં નારાયણવલ્લભઃ ॥ ૧૭॥

પં ફં બં ભં મમ સ્કન્ધૌ પાતુ મં મહસાં નિધિઃ ।
યં રં લં વં ભુજૌ પાતુ મૂલં સકનાયકઃ ॥ ૧૮॥

શં ષં સં હં પાતુ વક્ષો મૂલમન્ત્રમયોઇ ધ્રુવઃ ।
ળં ક્ષઃ કુક્ષિંસ સદા પાતુ ગ્રહાથો દિનેશ્વરઃ ॥ ૧૯॥

ઙં ઞં ણં નં મં મે પાતુ પૃષ્ઠં દિવસનાયકઃ ।
અં આં ઇં ઈં ઉં ઊં ઋં ૠં નાભિં પાતુ તમોપહઃ ॥ ૨૦॥

ૡં ૡૃં એં ઐં ઓં ઔં અં અઃ લિઙ્ગં મેઽવ્યાદ્ ગ્રહેશ્વરઃ ।
કં ખં ગં ઘં ચં છં જં ઝં કટિં ભાનુર્મમાવતુ ॥ ૨૧॥

ટં ઠં ડં ઢં તં થં દં ધં જાનૂ ભાસ્વાન્ મમાવતુ ।
પં ફં બં ભં યં રં લં વં જઙ્ઘે મે।આવ્યાદ્ વિભાકરઃ ॥ ૨૨॥

શં ષં સં હં ળં ક્ષઃ પાતુ મૂલં પાદૌ ત્રયિતનુઃ ।
ઙં ઞં ણં નં મં મે પાતુ સવિતા સકલં વપુઃ ॥ ૨૩॥

સોમઃ પૂર્વે ચ માં પાતુ ભૌમોઽગ્નૌ માં સદાવતુ ।
બુધો માં દક્ષિણે પાતુ નૈઋત્યા ગુરરેવ મામ્ ॥ ૨૪॥

પશ્ચિમે માં સિતઃ પાતુ વાયવ્યાં માં શનૈશ્ચરઃ ।
ઉત્તરે માં તમઃ પાયાદૈશાન્યાં માં શિખી તથા ॥ ૨૫॥

ઊર્ધ્વં માં પાતુ મિહિરો મામધસ્તાજ્જગત્પતિઃ ।
પ્રભાતે ભાસ્કરઃ પાતુ મધ્યાહ્ને માં દિનેશ્વરઃ ॥ ૨૬॥

સાયં વેદપ્રિયઃ પાતુ નિશીથે વિસ્ફુરાપતિઃ ।
સર્વત્ર સર્વદા સૂર્યઃ પાતુ માં ચક્રનાયકઃ ॥ ૨૭॥

રણે રાજકુલે દ્યૂતે વિદાદે શત્રુસઙ્કટે ।
સઙ્ગામે ચ જ્વરે રોગે પાતુ માં સવિતા પ્રભુઃ ॥ ૨૮॥

ઓં ઓં ઓં ઉત ઓંઉૐ હ સ મ યઃ સૂરોઽવતાન્માં ભયાદ્ ।
હ્રાં હ્રીં હ્રું હહહા હસૌઃ હસહસૌઃ હંસોઽવતાત્ સર્વતઃ ।
સઃ સઃ સઃ સસસા નૃપાદ્વનચરાચ્ચૌરાદ્રણાત્ સંકટાત્ ।
પાયાન્માં કુલનાયકોઽપિ સવિતા ઓં હ્રીં હ સૌઃ સર્વદા ॥ ૨૯॥

દ્રાં દ્રીં દ્રૂં દધનં તથા ચ તરણિર્ભાંભૈર્ભયાદ્ ભાસ્કરો
રાં રીં રૂં રુરુરૂં રવિર્જ્વરભયાત્ કુષ્ઠાચ્ચ શૂલામયાત્ ।
અં અં આં વિવિવીં મહામયભયં માં પાતુ માર્તણ્ડકો
મૂલવ્યાપ્તતનુઃ સદાવતુ પરં હંસઃ સહસ્રાંશુમાન્ ॥ ૩૦॥

ઇતિ શ્રીકવચ્ચં દિવ્યં વજ્રપઞ્જરકાભિધમ્ ।
સર્વદેવરહસ્યં ચ માતૃકામન્ત્રવેષ્ટિતમ્ ॥ ૩૧॥

મહારોગભયઘ્નં ચ પાપઘ્નં મન્મુખોદિતમ્ ।
ગુહ્યં યશસ્કરં પુણ્યં સર્વશ્રેયસ્કરં શિવે ॥ ૩૨॥

લિખિત્વા રવિવારે તુ તિષ્યે વા જન્મભે પ્રિયે ।
અષ્ટગન્ધેન દિવ્યેન સુધાક્ષીરેણ પાર્વતિ ॥ ૩૩॥

અર્કક્ષીરેણ પુણ્યેન ભૂર્જત્વચિ મહેશ્વરિ ।
કનકીકાષ્ઠલેખન્યા કવચં ભાસ્કરોદયે ॥ ૩૪॥

શ્વેતસૂત્રેણ રક્તેન શ્યામેનાવેષ્ટયેદ્ ગુટીમ્ ।
સૌવર્ણેનાથ સંવેષ્ઠ્ય ધારયેન્મૂર્ધ્નિ વા ભુજે ॥ ૩૫॥

રણે રિપૂઞ્જયેદ્ દેવિ વાદે સદસિ જેષ્યતિ ।

રાજમાન્યો ભવેન્નિત્યં સર્વતેજોમયો ભવેત્ ॥ ૩૬॥

કણ્ઠસ્થા પુત્રદા દેવિ કુક્ષિસ્થા રોગનાશિની ।
શિરઃસ્થા ગુટિકા દિવ્યા રાકલોકવશઙ્કરી ॥ ૩૭॥

ભુજસ્થા ધનદા નિત્યં તેજોબુદ્ધિવિવર્ધિની ।
વન્ધ્યા વા કાકવન્ધ્યા વા મૃતવત્સા ચ યાઙ્ગના ॥ ૩૮॥

કણ્ઠે સા ધારયેન્નિત્યં બહુપુત્રા પ્રજાયયે ।
યસ્ય દેહે ભવેન્નિત્યં ગુટિકૈષા મહેશ્વરિ ॥ ૩૯॥

મહાસ્ત્રાણીન્દ્રમુક્તાનિ બ્રહ્માસ્ત્રાદીનિ પાર્વતિ ।
તદ્દેહં પ્રાપ્ય વ્યર્થાનિ ભવિષ્યન્તિ ન સંશયઃ ॥ ૪૦॥

ત્રિકાલં યઃ પઠેન્નિત્યં કવચં વજ્રપઞ્જરમ્ ।
તસ્ય સદ્યો મહાદેવિ સવિતા વરદો ભવેત્ ॥ ૪૧॥

અજ્ઞાત્વા કવચં દેવિ પૂજયેદ્ યસ્ત્રયીતનુમ્ ।
તસ્ય પૂજાર્જિતં પુણ્યં જન્મકોટિષુ નિષ્ફલમ્ ॥ ૪૨॥

શતાવર્તં પઠેદ્વર્મ સપ્તમ્યાં રવિવાસરે ।
મહાકુષ્ઠાર્દિતો દેવિ મુચ્યતે નાત્ર સંશયઃ ॥ ૪૩॥

નિરોગો યઃ પઠેદ્વર્મ દરિદ્રો વજ્રપઞ્જરમ્ ।
લક્ષ્મીવાઞ્જાયતે દેવિ સદ્યઃ સૂર્યપ્રસાદતઃ ॥ ૪૪॥

ભક્ત્યા યઃ પ્રપઠેદ્ દેવિ કવચં પ્રત્યહં પ્રિયે ।
ઇહ લોકે શ્રિયં ભુક્ત્વા દેહાન્તે મુક્તિમાપ્નુયાત્ ॥ ૪૫॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવિરહસ્યે
વજ્રપઞ્જરાખ્યસૂર્યકવચનિરૂપણં ત્રયસ્ત્રિંશઃ પટલઃ ॥ ૩૩ ॥

Surya kavacha is attributed to Rudrayamala and quoted in Devirahasya

Encoded by Mike Magee mike.magee at theregister.co.uk

*Surya Sun Kavacham*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*